# નિર્વાણ દસકં

## Nirvana Dasakam

---

નિર્વાણદશકં ।

ન ભૂમિર્ન તોયં ન તેજો ન વાયુર્ન ખં નેન્દ્રિયં  વા ન તેષાં સમૂહઃ ।
અનૈકાન્તિકત્વાત્સુષુપ્ત્યૈકસિદ્ધસ્તદેકોઽવશિષ્ટઃ શિવઃ કેવલોઽહમ ।।૧।।

ન વર્ણા ન વર્ણાશ્રમાચારધર્મા ન મે ધારણાધ્યાનયોગાદયોઽપિ ।
અનાત્માશ્રયોઽહં મમાધ્યાસહાનાત્તદેકોઽવશિષ્ટઃ શિવઃ કેવલોઽહમ ।।૨।।

ન માતા પિતા વા ન દેવા ન લોકા ન વેદા ન યજ્ઞા ન તીર્થં બ્રુવન્તિ ।
સુષુપ્તૌ નિરસ્તાતિશૂન્યાત્મકત્વાત્તદેકોઽવશિષ્ટઃ શિવઃ કેવલોઽહમ ।।૩।।

ન સાઙ્ખ્યં ન શૈવં ન તત્પાઞ્ચરાત્રં ન જૈનં ન મીમાંસકાદેર્મતં વા ।
વિશિષ્ટાનુભૂત્યા વિશુદ્ધાત્મકત્વાત્તદેકોઽવશિષ્ટઃ શિવઃ કેવલોઽહમ  ।।૪।।

ન શુક્લં ન કૃષ્ણં ન રક્તં ન પીતં ન પીનં ન કુબ્જં ન હ્રસ્વં ન દીર્ઘમ ।
અરૂપં તથા જ્યોતિરાકારકત્વાત્તદેકોઽવશિષ્ટઃ શિવઃ કેવલોઽહમ  ।।૫।।

ન જાગ્રન્ન મે સ્વપ્નકો વા સુપુપ્તિર્ન વિશ્વો ન વા તૈજસઃ પ્રાજ્ઞકો વા ।
અવિદ્યાત્મકત્વાન્ત્રયાણાં તુરીયં તદેકોઽવશિષ્ટઃ શિવઃ કેવલોઽહમ  ।।૬।।

ન શાસ્તા ન શાસ્ત્રં ન શિષ્યો ન શિક્ષા ન ચ ત્વં ન ચાહં ન ચાયં પ્રપઞ્ચઃ ।
સ્વરૂપાવબોધાદ્વિકલ્પાસહિષ્ણુસ્તદેકોઽવશિષ્ટઃ શિવઃ કેવલોઽહમ  ।।૭।।

ન ચોર્ધ્વં ન ચાધો ન ચાન્તર્ન બાહ્યં ન મધ્યં ન તિર્યઙ ન પૂર્વા પરાદિક ।
વિયદ્વ્યાપકત્વાદખણ્ડૈકરૂપસ્તદેકોઽવશિષ્ટઃ શિવઃ કેવલોઽહમ  ।।૮।।

અપિ વ્યાપકત્વાદિતત્ત્વાત્પ્રયોગાત્સ્વતઃ સિદ્ધભાવાદનન્યાશ્રયત્વાત ।
જગત્તુચ્છમેતત્સમસ્તં તદન્યસ્તદેકોઽવશિષ્ટઃ શિવઃ કેવલોઽહમ  ।।૯।।

ન ચૈકં તદન્યદ્દ્વિતીયં કુતઃ સ્યાન્ન ચાકેવલત્વં ન વા કેવલત્વમ ।
ન શૂન્યં ન ચાશૂન્યમદ્વૈતકત્વાત્કથં સર્વવેદાન્તસિદ્ધં બ્રવીમિ ।।૧૦।।

ઇતિ શ્રીમચ્છઙ્કરાચાર્યવિરચિતં નિર્વાણદશકસ્તોત્રં સંપૂર્ણમ ।।

**www.shaivam.org**

---